# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा – शास्त्री-3** | **सत्रम् – 5** | **गुणाः - 70** |
| **विषयः –** धर्मशास्त्रम् | **प्रश्नपत्रम् - 7 - CE - 3.5.5** | समयः- 3 तः 6 |
| **दिनाङ्कः- 16/10/2019** | **सन्दर्भग्रन्थः –** याज्ञवल्क्यस्मृतिः (प्रायश्चित्ताध्यायः) | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः ससन्दर्भं व्याख्या कार्या । 10**

1. पञ्चधा संभृतः कायो यदि पञ्चत्वमागतः ।
   कर्मभिः स्वशरीरोत्तैस्तत्र का परिदेवना ।।
2. अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च ।
   निवासराजनि प्रेते तदहः शुद्धिकारणम् ।
3. तस्य वृत्तं कुलं शीलं श्रुतमध्ययनं तपः ।
   ज्ञात्वा राजा कुटुम्बं च धर्म्यां वृत्तिं प्रकल्पयेत् ।

**प्र-2 कस्यचिदेकस्य निबन्धात्मकमुत्तरं लिखत । 10**

1. रजस्वलायाः सूतिकायाश्चमरणे निर्णयः कः भवति इति विविच्यताम् ।
2. वैश्यवृत्त्या जीवतो ब्राह्मणस्यापणनीयविषये निरूपणं कुरुत ।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 द्वयोः श्लोकयोः ससन्दर्भं व्याख्या कार्या । 10**

1. सुतविन्यस्तपत्निकस्तया वाऽनुगतो वनम् ।
   वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत् ।।
2. स्त्रीपुंसयोस्तु संयोगे विशुद्धे शुक्रशोणिते ।
   पञ्चधातून्स्वयं षष्ठ आदते युगपत्प्रभुः ।।
3. वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ।
   तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति ।।

**प्र-4 कस्यचिदेकस्य सारभूतं वर्णनं कुरुत । 10**

1. सकलानुष्ठानासमर्थविषये विस्तरेण निरूपणं कुरुत ।
2. इन्द्रियनिरोधोपायतया संसारस्वरूपनिरूपणं कुरुत ।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 द्वयोः श्लोकयोः ससन्दर्भं व्याख्या कार्या । 10**

1. सखीभार्याकुमारीषु स्वयोनिष्वन्त्यजासु च ।
   सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतम् ।।

2. वाल वासा जटी वापि ब्रह्महत्याव्रतं चरेत् ।
   पिण्याकं वा कणान्वापि भक्षयोस्त्रिसमा निशि ।।
3. देशं कालं वयः शक्तिं पापं चावेक्ष्य यत्नतः ।
   प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिः ।।

**प्र-6 कस्यचिदेकस्य ग्रन्थोक्तदिशा सविस्तरमुत्तरं यच्छत । 10**

1. सुवर्णस्तेय प्रायश्चित्तं मिताक्षरानुसारेण वर्ण्यताम् ।
2. कृच्छ्रचान्द्रायणसाधारणेतिकर्तव्यता विषये ग्रन्थानुसारेण वर्णनं कुरुत ।

**प्र-7 दशानां लघूत्तराणि लिखत । 10**

1. अपवित्र वस्तुन: शुद्धिः कया रीत्या भवति
2. अकार्य कारिणां निषिद्धसेविनां शुद्धिः कया रीत्या भवति
3. सपिण्डे जन्ममृत्युषु क्षत्रियाणां कति दिवसपर्यन्तं अशौचं भवति
4. अशौच प्रकरणे कति श्लोकाः सन्ति
5. दीक्षित - शब्दस्य कोऽर्थः
6. वैश्यवृत्यापि जीवन्नरः किं किं न विक्रीणीत
7. त्रिषवण - शब्दस्य कोऽर्थः
8. अग्न्युपासनायामसमर्थः जनः किं कुर्यात्
9. जीवस्य कायस्वरूपं किं किं भवति
10. ज्ञानेन्द्रियाणि कानि सन्ति
11. अक्षिकूटमिति शब्देन को भाव:
12. तमोगुणयुक्ताः जनाः कस्यां योन्यां जायन्ते
13. अजवीथी अगस्त्ययोः मध्यमार्गं किं कथ्यते
14. पितृयाने कति सहस्त्र संख्यायां गृहस्थमुनय निवसन्ति
15. ब्रह्महत्यायाः पापेभ्यः मुक्त्यर्थं कस्य मंत्रस्य आहुतिः दातव्या

*******************